प्रथमः पाठः

# प्रार्थना







त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्वं मम देव देव ॥

नमो नगेन्द्राय हिमालयाय
नमो विशालाय च सागराय।
नदीगणेभ्यः सुखसाधनेभ्यो
देशाय तस्मै मम भारताय॥

## शब्दार्थाः

| | | |
|---|---|---|
| **त्वमेव** | = | तुम्हीं (त्वम् + एव) |
| **च** | = | और |
| **बन्धुः** | = | सम्बन्धी |
| **सखा** | = | मित्र |
| **द्रविणम्** | = | धन |
| **सर्वम्** | = | सब कुछ |
| **मम** | = | मेरा |
| **नमो (नमः)** | = | नमस्कार/प्रणाम |
| **नगेन्द्राय** | = | पर्वतराज को/के लिए |
| **विशालः** | = | बड़ा |
| **नदीगणेभ्यः** | = | नदी समूह को/के लिए |
| **सुखसाधनेभ्यो** | = | सुख के साधनों के लिए |
| **देशाय** | = | देश को/देश के लिए |
| **तस्मै** | = | उसको/के लिए |
| **भारताय** | = | भारत देश को/के लिए |

## व्याकरणम्

त्वमेव = त्वम् + एव । अहमेव, त्वमपि = **तुम भी (त्वम् + अपि); अहमस्मि (अहम् + अस्मि) मैं हूँ। बन्धुः + च = बन्धुश्च। नमः – नमस्कार। इसके** (नमः के) प्रयोग में **चतुर्थी विभक्ति लगती है जैसे–भारताय नमः, सागराय नमः, देवाय नमः, देवेभ्यः नमः। तस्मै नमः = उसे नमस्कार। पर्वतराजाय हिमालयाय नमः, मुनये नमः।**

## अभ्यासः

### मौखिकः

1. **इन शब्दों का अर्थ बताएँ–**

   द्रविणम्, सखा, विशालाय, नगेन्द्राय, मम।

2. **'बन्धुश्च' के समान इन शब्दों को जोड़कर बोलें–**

   हरिः + च, लोकः + च, पुनः + च, अजः + चरति।

3. **इन शब्दों का चतुर्थी एकवचन में रूप बताएँ–**

सागर, विशाल, देश, पुत्र, हिमालय।

4. **द्वितीय पद्य का पाठ करें।**

5. **'नमः' शब्द से युक्त पाँच वाक्य बोलें।**

## लिखितः

6. **इन वाक्यों में रिक्त स्थानों को सही शब्द से भरें–**

(क) नमो ............ च सागराय।

(ख) .............. तस्मै .......... भारताय।

(ग) ............... सर्वं मम ............।

(घ) त्वमेव ............ द्रविणं त्वमेव।

(ङ) नदी .......... सुखसाधनेभ्यः।

7. निम्नलिखित वाक्यों को दो बार लिखें –

(क) तुम्हीं मेरे पिता हो (असि)। – त्वमेव मम पिता असि ।

(ख) मैं ही पुत्र हूँ (अस्मि)। – अहमेव पुत्रोऽस्मि ।

(ग) विशाल सागर को नमस्कार। – विशालाय सागराय नमस्कारः ।

(घ) भारत देश को नमस्कार। – भारताय देशाय नमस्कारः ।

(ङ) भारत मेरा सब कुछ है (अस्ति)। – भारतवर्षं मम सर्वम् अस्ति ।

8. **इन शब्दों से वाक्य बनाएँ–**

द्रविणम्, तस्मै, मम, नदीगणेभ्यः, सखा।

9. **भारत की विशेषताओं पर पाँच वाक्य हिन्दी में लिखें।**

10. **अपने स्मरण से कोई श्लोक लिखें जो इस पाठ से भिन्न हो।**

11. **इन का सुमेल करें–**

| | |
|---|---|
| (i) नग + इन्द्रः | (क) भारतम् |
| (ii) हिम + आलयः | (ख) रामश्च |
| (iii ) भरतः | (ग) नगेन्द्रः |
| (iv) सगरः | (घ) हिमालयः |
| (v ) रामः + च | (ङ्) सागरः |


द्वितीयः पाठः

# सरलपदपरिचयः


**गृहोपकरणानि –**




एषा खट्वा अस्ति।




कम्बलम् उष्णम् भवति।




घटः पूर्णः अस्ति।



पर्यङ्कः विस्तृतः अस्ति।




अयम् दर्पणः अस्ति।




वर्तिका प्रज्वलिता अस्ति।


पशवः –



अश्वः धावति।




अजा चरति।




गजः विशालः भवति।



उष्ट्रः मरुस्थलस्य यानम् अस्ति।



कच्छपः मन्दम् चलति।



कुक्कुरः बुक्कति।


## पक्षिणः –



मयूरः नृत्यति।




कोकिलः कूजति।



कपोतः तिष्ठति।



कुक्कुटः अन्नम् खादति।




हंसः तडागे तरति।

## पुष्पाणि –



कमलम् राष्ट्रियम् पुष्पम् अस्ति।




पाटलपुष्पम् रक्तम् अस्ति।



इदम् चम्पक-पुष्पम् अस्ति।




मल्लिका विकसति।




इदम् जपा-पुष्पम् अस्ति।


## फलानि –




आम्रम् मधुरम् फलम् भवति।




अमृतफलम् पक्वम् अस्ति




सः जम्बूफलम् खादति।



द्राक्षा अम्ला अस्ति।



लीचिका मधुरा कोमला च भवति।



सेबम् शोणम् भवति।


## शरीरावयवाः –





तस्य ललाटम् विशालम् अस्ति।





नासिका तुङ्गा अस्ति।




कर्णः सुन्दरः अस्ति।



**नेत्रम् आकर्षकम् अस्ति।**



**रामस्य दन्ताः स्वस्थाः सन्ति।**



अयम् दीर्घः हस्तः अस्ति।

## शब्दार्थः

| | | |
|---|---|---|
| **एषा ( स्त्री० )** | = | यह |
| **खट्वा** | = | खटिया |
| **कम्बलम्** | = | कम्बल |
| **उष्णम्** | = | गर्म |
| **भवति** | = | होता है / होती है |
| **घटः** | = | घड़ा |
| **पूर्णः** | = | पूरा/भरा हुआ |
| **अस्ति** | = | है |
| **पर्यङ्कः** | = | पलंग |
| **विस्तृतः** | = | बड़ा/फैला हुआ/लम्बा-चौड़ा |
| **अयम् ( पुं )** | = | यह |
| **दर्पणः** | = | दर्पण/ऐनक |

| | | |
|---|---|---|
| वर्तिका | = | मोमबत्ती/बत्ती/दीपक |
| प्रज्वलिता | = | जलती हुई/जल रही |
| अश्वः | = | घोड़ा |
| धावति | = | दौड़ता है/दौड़ती है |
| अजा | = | बकरी |
| चरति | = | चरती है/चरता है |
| गजः | = | हाथी |
| विशालः | = | बड़ा |
| उष्ट्रः | = | ऊँट |
| मरुस्थलस्य | = | रेगिस्तान का |
| यानम् | = | गाड़ी/सवारी/वाहन |
| कच्छपः | = | कछुआ |
| मन्दम् | = | धीरे |
| कुक्कुरः | = | कुत्ता |
| बुक्कति | = | भूँकता है |
| मयूरः | = | मोर |
| नृत्यति | = | नाचती है/नाचता है |
| कोकिलः | = | कोयल |
| कूजति | = | कूकता है |
| कपोतः | = | कबूतर |
| तिष्ठति | = | बैठता है |
| कुक्कुटः | = | मुर्गा |
| अन्नम् | = | अनाज |
| खादति | = | खाता है/खाती है |
| तडागे | = | तालाब में |
| तरति | = | तैरता है |
| पुष्पम् | = | फूल |
| पाटलपुष्पम् | = | गुलाब का फूल |

| | | |
|---|---|---|
| रक्तम् | = | लाल |
| इदम् ( नपुं ) | = | यह |
| चम्पकपुष्पम् | = | चम्पा का फूल |
| मल्लिका | = | चमेली |
| जपापुष्पम् | = | उड़हुल का फूल |
| विकसति | = | खिलता है |
| आम्रम् | = | आम |
| मधुरम् | = | मीठा |
| अमृतफलम् | = | अमरूद |
| पक्वम् | = | पका |
| जम्बूफलम् | = | जामुन के फल |
| द्राक्षा | = | अंगूर |
| अम्ला | = | खट्टी |
| लीचिका | = | लीची |
| सेबम् | = | सेब |
| शोणम् | = | लाल |
| ललाटम् | = | मस्तक |
| नासिका | = | नाक |
| तुङ्गा | = | ऊँची/लम्बी |
| तस्य | = | उसका |
| कर्णः | = | कान |
| नेत्रम् | = | आँख |
| आकर्षकम् | = | आकर्षक/सुन्दर |
| दन्ताः | = | दाँत |
| स्वस्थः | = | नीरोग |
| सन्ति | = | हैं |
| हस्तः | = | हाथ |
| दीर्घः | = | लम्बा |
| नरः | = | पुरुष |

## अभ्यासः

### मौखिकः

1. **उच्चारण करें–**

| | | | |
|---|---|---|---|
| (क) | कम्बल | – | कम्बलम् |
| (ख) | कबूतर | – | कपोतः |
| (ग) | आम | – | आम्रम् |
| (घ) | लीची | – | लीचिका |
| (ङ) | कछुआ | – | कच्छपः |

2. **इनका संस्कृत रूप बताएँ–**

**घड़ा, तालाब, लाल, अमरूद, गर्म।**

3. **निम्न शब्दों का वर्णविच्छेद करें :–**

(क) नरः – न् + अ + र् + अः

(ख) इदम् –

(ग) नेत्रम् –

(घ) गजः –

(ङ) अश्वः –

(च) पुष्पम् –

### लिखितः

5. **उपयुक्त शब्दों को मिलाकर वाक्य की रचना करें:–**

| | | |
|---|---|---|
| (क) | गजाः | गच्छतः |
| (ख) | वयम् | गायति |
| (ग) | बालकौ | पतति |
| (घ) | वृक्षः | धावति |
| (ङ) | अश्वः | चलन्ति |
| (च) | गायकः | पठामः |

## 6. वर्णों को मिलाकर शब्द बनाएँ–

उदाहरण–

(क) न् + अ + र् + अः = नरः

(ख) घ् + अ + ट् + अः =

(ग) व् + ऋ + क्ष् + अः + =

(घ) भ् + र् + अ + म् + अ + र् + अः =

(ङ) ब् + आ + ल् + अः =

(च) प् + अ + ठ् + अ + त् + इ =

## 7. कोष्ठक में से उपयुक्त शब्द चुनकर रिक्त स्थानों की पूर्त्ति करें :

**यथा – बालिका पठति। ( बालिका/बालिकाः )**

| | |
|---|---|
| (क) अयम् ……………। | (बालकाः/बालकः/बालकौ) |
| (ख) सा …………… । | (धावति/धावतः/धावन्ति) |
| (ग) …………… नृत्यन्ति । | (मयूरौ/मयूराः/मयूरः) |
| (घ) पुष्पाणि ……… । | (विकसति/विकसन्ति/विकसतः) |
| (ङ) आवाम् …………… । | (पठामि/पठावः/पठामः) |
| (च) ………………… कूर्दन्ति । | (नृपः/मण्डूकः/वानराः) |

## 8. परस्पर मेल कीजिए :–

(क)  (क) मृगः चलति ।

(ख)  (ख) छात्रा पठति ।

(ग)  (ग) मयूरः नृत्यति ।

(घ)  (घ) छात्रः गच्छति ।

(ङ)  (ङ) अश्वः धावति ।

**9. उदाहरण के अनुसार रिक्त स्थानों की पूर्त्ति कीजिए:–**

| | | | | |
|---|---|---|---|---|
| **यथा : –** | **बालकः** | **बालकौ** | **बालकाः** | **( पुंल्लिङ्ग )** |
| | **लता** | **लते** | **लताः** | **( स्त्रीलिङ्ग )** |
| | **फलम्** | **फले** | **फलानि** | **( नपुंसक लिङ्ग )** |
| **(क)** | **देवः** | ..................... | ..................... | |
| **(ख)** | **नरः** | ..................... | ..................... | |
| **(ग)** | **नृपः** | ..................... | ..................... | |
| **(घ)** | **पुष्पम्** | ..................... | ..................... | |
| **(ङ)** | **गृहम्** | ..................... | **गृहाणि** | |
| **(च)** | **बालिका** | ..................... | ..................... | |

10. संस्कृत में अनुदित निम्नलिखित वाक्यों को दो बार लिखें –

(क) यह लड़का है – अयं बालकः अस्ति।

(ख) यह विद्यालय है – अयं विद्यालयः अस्ति।

(ग) आम मीठा होता है – आम्रं मधुरं भवति।

(घ) वे लड़कियाँ हैं – ताः बालिकाः सन्ति।


(ङ) वह कौन है – सः कः अस्ति ?

तृतीयः पाठः

# संख्याज्ञानम्




एकः बालकः पठति। ( पुं० )



एका बाला पठति। ( स्त्री० )




एकम् पुष्पम् विकसति। ( नपुं० )




द्वौ अश्वौ धावतः। ( पुं० )




द्वे महिले गायतः। ( स्त्री० )




द्वे चक्रे भ्रमतः ( नपुं० )



त्रयः खगाः कूजन्ति। ( पुं० )



तिस्रः बालिकाः क्रीडन्ति। ( स्त्री० )



त्रीणि पत्राणि पतन्ति। ( नपुं० )




खट्वायाः चत्वारः पादाः सन्ति। ( पुं० )




चतस्रः महिलाः भ्रमन्ति। ( स्त्री० )



अत्र चत्वारि पुष्पाणि सन्ति। ( नपुं० )




पञ्च पाण्डवाः गच्छन्ति।




भ्रमरस्य षट् पादाः सन्ति।




सप्त तारकाः गगने भान्ति।




अत्र अष्ट फलानि सन्ति।




तत्र नव पतंगाः सन्ति ।




दश मोटरयानानि गच्छन्ति।



एकादश फलानि गुच्छे सन्ति।



अत्र द्वादश कन्दुकानि सन्ति।



तत्र त्रयोदश पुस्तकानि सन्ति।



चतुर्दश छात्राः नृत्यन्ति।

जले पञ्चदश मीनाः तरन्ति।

पुरा भारते षोडश जनपदाः आसन्।

इमानि सप्तदश चक्राणि चलन्ति।

पुराणानि अष्टादश सन्ति।

ऊनविंशतिः भ्रमराः भ्रमन्ति ।

विंशतिः चटकाः विहरन्ति।

## शब्दार्थः

| | | |
|---|---|---|
| एकः (पु०) | = | एक |
| बालकः | = | लड़का/बालक |
| पठति | = | पढ़ता है/पढ़ती है |
| एका (स्त्री०) | = | एक |
| बाला | = | लड़की/बालिका |
| एकम् (नपुं) | = | एक |
| द्वौ (पुं०) | = | दो |
| अश्वौ | = | दो घोड़े |
| धावतः | = | दौड़ते हैं |
| द्वे (स्त्री०) | = | दो |
| महिले | = | (दो) स्त्रियाँ/महिलाएँ |

| | | |
|---|---|---|
| चक्रे | = | (दो) पहिये |
| द्वे ( नपुं ) | = | दो |
| भ्रमतः ( द्वि० ) | = | घूमते हैं |
| त्रयः (पुं०) | = | तीन |
| खगाः | = | चिड़ियाँ/पक्षिगण |
| तिस्रः ( स्त्री० ) | = | तीन |
| क्रीडन्ति | = | खेलती हैं/खेलते हैं |
| त्रीणि ( नपुं० ) | = | तीन |
| पत्राणि | = | पत्ते |
| पतन्ति | = | गिरते हैं |
| चत्वारः ( पुं० ) | = | चार |
| पादाः | = | पैर |
| सन्ति | = | हैं |
| चतस्रः ( स्त्री० ) | = | चार |
| भ्रमन्ति | = | घूमती/घूमते हैं |
| वृक्षे | = | पेड़ में |
| चत्वारि ( नपुं ) | = | चार |
| पुष्पाणि | = | फूल |
| पञ्च | = | पाँच |

| | | |
|---|---|---|
| पाण्डवाः | = | पाण्डव |
| भ्रमरस्य | = | भ्रमर का/भौंरे का |
| षट् | = | छह |
| सप्त | = | सात |
| तारकाः | = | तारे |
| गगने | = | आकाश में |
| भान्ति | = | चमकते हैं |
| अष्ट | = | आठ |
| नव | = | नौ |
| पतंगाः | = | पतंग |
| दश | = | दस |
| मोटरयानानि | = | मोटरगाड़ियाँ |
| एकादश | = | ग्यारह |
| गुच्छे | = | गुच्छे में |
| द्वादश | = | बारह |
| अत्र | = | यहाँ |
| कन्दुकानि | = | गेंदें |
| तत्र | = | वहाँ |
| त्रयोदश | = | तेरह |

| | | |
|---|---|---|
| पुस्तकानि | = | पुस्तकें/किताबें |
| तिष्ठन्ति | = | रखी हैं |
| चतुर्दश | = | चौदह |
| नृत्यन्ति | = | नाचती हैं |
| जले | = | जल में/पानी में |
| पञ्चदश | = | पन्द्रह |
| मीनाः | = | मछलियाँ |
| तरन्ति | = | तैरते हैं/तैरती हैं |
| पुरा | = | पहले/प्राचीन काल में |
| षोडश | = | सोलह |
| जनपदाः | = | जनपद |
| आसन् | = | थे |
| इमानि (नपुं) | = | ये |
| सप्तदश | = | सत्रह |
| चक्राणि | = | चक्के |
| चलन्ति | = | चलते हैं |
| एतानि (नपुं) | = | ये |
| अष्टादश | = | अठारह |
| पुराणानि | = | पुराण |

| | | |
|---|---|---|
| ऊनविंशतिः | = | उन्नीस |
| विंशतिः | = | बीस |
| चटकाः | = | गौरेये (चिड़ियाँ) |
| विहरन्ति | = | विहार करती हैं |

## व्याकरणम्

लिङ्ग.–संस्कृत शब्द तीन लिङ्गों में विभक्त हैं– पुँल्लिङ्ग., स्त्रीलिङ्ग. और नपुंसकलिङ्ग. । लिङ्ग. सभी सुबन्त शब्दों में अनिवार्य रूप से रहता है । कुछ शब्द केवल पुँल्लिङ्ग. हैं जैसे–गज, मीन, साधु, मुनि, राम, बालक, नर इत्यादि । कुछ शब्द केवल स्त्रीलिङ्ग. हैं जैसे–बालिका, लता, रमा, शाला (घर), विद्या, शिक्षिका, देवी, धेनु (गाय), भूमि इत्यादि । कुछ शब्द केवल नपुंसकलिङ्ग. में होते हैं जैसे-फल, धन, पात्र, अंग, गृह, उपवन, वारि, दधि इत्यादि । कोश–ग्रन्थों में संस्कृत शब्दों के लिङ्ग. बताये जाते हैं । विशेषण शब्दों का लिङ्ग. उनके विशेष्य के अनुसार होता है ।

**जैसे–**

**पुँल्लिङ्ग–**

1. **अयम् बालकः चतुरः अस्ति ।**
   **(बालक पुँल्लिंग है अतः उसके साथ जुड़े अयम् और चतुरः दोनों पुँल्लिंग में हैं ।)**
2. **अयम् गजः विशालः अस्ति ।**
   **(गज के पुँल्लिंग होने से अयम् और विशालः पुँल्लिंग हैं ।)**

**स्त्रीलिङ्ग–**

1. **इयम् महिला कुशला अस्ति ।**
   **(महिला स्त्रीलिंग है अतः उसकी विशेषता बतानेवाला कुशला शब्द तथा निर्देशक इयम् शब्द स्त्रीलिंग में हैं ।)**
2. **इमाः बालिकाः सुरूपाः सन्ति ।**
   **(बालिकाः के अनुसार इमाः और सुरूपाः स्त्रीलिंग बहुवचन में हैं ।)**

**नपुंसकलिङ्ग–**

1. **इदम् पुष्पम् सुन्दरम् अस्ति ।**
   **(पुष्प नपुंसकलिंग में है अतः इदम् और सुन्दरम् भी उसी लिंग में हैं।)**
2. **इमानि फलानि पक्वानि सन्ति ।**
   **(फलानि के अनुसार इमानि, पक्वानि हैं ।)**

**वचन**–संस्कृत भाषा में शब्दों के तीन वचनों में प्रयोग होते हैं–

एकवचन, द्विवचन और बहुवचन । सभी लिङ्गों में ये वचन होते हैं । जैसे–

| | | | | |
|---|---|---|---|---|
| पुँल्लिङ्ग | – | बालकः | बालकौ | बालकाः । |
| स्त्रीलिङ्ग | – | बालिका | बालिके | बालिकाः । |
| नपुंसकलिङ्ग | – | फलम् | फले | फलानि । |

**इनके निर्देशक सर्वनाम शब्द इस प्रकार हैं –**

| | | | | |
|---|---|---|---|---|
| पुँल्लिङ्ग | – | अयम् | इमौ | इमे । |
| स्त्रीलिङ्ग | – | इयम् | इमे | इमाः । |
| नपुंसकलिङ्ग | – | इदम् | इमे | इमानि । |

**क्रियापदों में भी वचन इन शब्दों के कारण ही आते हैं । कुछ उदाहरण देखें –**

पुँल्लिङ्ग – अयम् बालकः पठति (एकवचन) ।
इमौ बालकौ धावतः (द्विवचन) ।
इमे गजाः चलन्ति (बहुवचन) ।

स्त्रीलिङ्ग – इयम् लता पतति (एकवचन) ।
इमे बालिके धावतः (द्विवचन) ।
इमाः महिलाः गायन्ति (बहुवचन) ।

नपुंसकलिङ्ग – इदम् पुष्पम् शोभनम् अस्ति (एकवचन) ।
इमे पत्रे पततः (द्विवचन) ।
इमानि फलानि पक्वानि सन्ति (बहुवचन) ।

हिन्दी में संख्यावाचक शब्दों के लिङ्ग में समानता है। संस्कृत में एक से चार तक की संख्याएँ तीन लिङ्गों में पृथक्-पृथक् होती हैं। एकः (पुं०), एका (स्त्री०), एकम् (नपुं०)। द्वि केवल द्विवचन में होता है, द्वौ (पुं०), द्वे (स्त्री० तथा नपुंसक)। त्रि और चतुर् केवल बहुवचन होते हैं, त्रयः (पुं०), तिस्रः (स्त्री०) त्रीणि (नपुं०)। चत्वारः (पुं०), चतस्रः (स्त्री०), चत्वारि (नपुं०)। पञ्च से आगे सभी संख्याएँ तीनों लिंगों में एक समान होती हैं।

# अभ्यासः

## मौखिकः

**1. उच्चारण करें :–**


| | | | |
|---|---|---|---|
| (क) | **एकः** | **एका** | **एकम्** |
| | द्वौ | द्वे | द्वे |
| | त्रयः | तिस्रः | त्रीणि |
| | चत्वारः | चतस्रः | चत्वारि |
| | पञ्च | षट् | सप्त |
| | अष्टौ (अष्ट) | नव | दश |
| | एकादश | द्वादश | त्रयोदश |
| | चतुर्दश | पञ्चदश | षोडश |
| | सप्तदश | अष्टादश | एकोनविंशतिः (नवदश, ऊनविंशतिः) |
| | विंशतिः | | |

| | | | |
|---|---|---|---|
| (ख) | **बालकः** | **बालकौ** | **बालकाः** |
| | गजः | गजौ | गजाः |
| | फलम् | फले | फलानि |
| | पुष्पम् | पुष्पे | पुष्पाणि |
| | चक्रम् | चक्रे | चक्राणि |
| | बाला | बाले | बालाः |
| | चटका | चटके | चटकाः |
| | महिला | महिले | महिलाः |


## लिखितः

**2. चित्र को देखकर संख्या लिखें :**

(क) ................... कन्दुकानि ।



(ख) ........................ पुष्पे ।




(ग) ............... बालकौ ।



(घ) ............... बालिका ।



(ङ) ............... कदली–फलानि



**3. नीचे लिखी संख्याओं के संस्कृतपद लिखें :**

| | | |
|---|---|---|
| यथा | ग्यारह | एकादश |
| | सात | ............... |
| | पाँच | ............... |
| | तेरह | ............... |
| | उन्नीस | ............... |
| | आठ | ............... |
| | पन्द्रह | ............... |
| | अठारह | ............... |

**4. निम्नांकित संख्याओं को बढ़ते क्रम में पुनः लिखें :**

| | | | |
|---|---|---|---|
| पञ्च | अष्टादश | द्वादश | नव |
| त्रयोदश | सप्त | एकादश | अष्ट |

5. **वर्णों को जोड़कर शब्द लिखें :**

यथा– क् + ऋ + ष् + ण् + अः = कृष्णः

(क) ब् + आ + ल् + अ + क् + अः =

(ख) प् + अ + त् + अ + न् + त् + इ =

(ग) न् + ऋ + त् + य् + अ + म् =

(घ) व् + अ + र् + ष् + आ =

6. **उचित शब्दों से रिक्त स्थानों की पूर्त्ति करें :—**

(क) मम ............. कर्णौ स्तः ।

(ख) गजस्य ............. पादाः भवन्ति।

(ग) मम ............. नासिका अस्ति।

(घ) द्विचक्रिकायां ..................... चक्रे भवतः।

(ङ) दशरथस्य ........... पुत्राः आसन्।

7. **रेखा खींचकर मिलान करें : —**

| | | | |
|---|---|---|---|
| (i) | षट् | (क) | देवाः |
| (ii) | पञ्च | (ख) | हस्तौ |
| (iii) | द्वौ | (ग) | मुखम् |
| (iv) | एकम् | (घ) | वेदाः |
| (v) | त्रयः | (ङ) | ऋतवः |
| (vi) | चत्वारः | (च) | पाण्डवाः |